International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 100-102
© 2022 IJSR
www.anantaajournal.com
Received: 19-07-2022
Accepted: 22-08-2022

**अरूण कुमार**
ग्राम- घोषपुर, पो०- कोदण्डा,
भाया- शाकुण्ड बॉका, बिहार,
भारत

Corresponding Author:
**अरूण कुमार**
ग्राम- घोषपुर, पो०- कोदण्डा,
भाया- शाकुण्ड बॉका, बिहार,
भारत

# पाटलिपुत्रस्य वैभवम्

**अरूण कुमार**

**सारांश:**
भारतस्य मानचित्रे पाटलिपुत्रनामधेयनगरस्य प्राचीनकालादेव महत्त्वपूर्ण स्थानम् अस्ति। भारतवर्षस्य महत्त्वपूर्ण नगरं पाटलिपुत्रं विद्यते। नगरमिदम् अधुना बिहारप्रान्तस्य राजधानी वर्तते। प्राचीनकाले अपि मगधसाम्राज्यस्य राजधानी अत्रैव आसीत्। मध्यकाले आजीमावाद नाम्ना कालान्तरे कुसुमपुर पुष्पपुर पाटलिपुत्र इत्यादिना अभिधानेन प्रसिद्धमिदं नगरं ऐतिहासिकतथ्यागाररूपेण अद्यापि प्रेक्षणीयं वरिवर्ति।

**कूट शब्द:** पाटलिपुत्रनामधेयनगरस्य, प्राचीनकालादेव, पाटलिपुत्र शास्त्रकारपरीक्षा

**भूमिका:**
पौराणिदृष्ट्या मिथकीयराजापुत्रकेन स्वस्य राज्यमहिष्यै पाटल्यै पाटलिग्राम नामधेयस्य नगरस्य चमत्कारेण (जादेन) निर्माणं कृतम् तदनन्तरं यदा तस्य गृहे पुत्रस्य जन्मः अभवत् तत् अस्य नगरस्य नाम पाटलिपुत्रम् इति जातम्। वस्तुतः त्रिसहस्राणि वर्षाणि भावत् अस्य नगरस्य अभिधानं पाटलिग्राम, कुसुमपुर, पुष्पपुर, पाटलिपुत्र इत्यादि नाम्ना परिवर्तितं। ऐतिहासिक दृष्या परिशीलनेन प्राप्यते यत्- इतिहासकाराणां मतेन ईसापूर्व षष्ठशताब्दयां सर्वप्रथमजातशत्रुना लिच्छिवीनां सैन्यशक्ति प्रतिरोधनार्थमेकं दुर्गमनिर्मितम्। ततः तस्य तनयोदयीभद्रः अत्रैव पाटलिपुत्रे स्वस्य सम्राजस्य राजधानी स्थापितवान्। मित्रलाभ कथायां- "अस्ति भागीरथी तीरे पाटलिपुत्रनामधेयं नगरम्"।[1] इत्यनेन सिध्यति यत् चतुर्थशताब्दयां पाटलिपुत्रनगरस्य अस्तित्वम् आसीत्। काव्यमीमांसाया कवि राजशेखरेण उद्धृतमस्ति–

"श्रूयते च पाटलिपुत्र शास्त्रकारपरीक्षा"।[2]

अनेन नगरस्यास्य प्राचीनता निर्विवादं प्रतीयते।

बिहारराज्यस्य राजधानीनगरं पाटलिपुत्रं सर्वेषु कालेषु महत्वमवधारयत्। सार्धसहस्त्रद्वयवर्षपरमितः वर्तते। अत्र धार्मिकक्षेत्रं, राजनीतिक्षेत्रम्, शैक्षणिकक्षेत्रम्, उद्योगक्षेत्रं विशेषेणाध्यानाकर्षकम्। वैदेशिकाः यात्रिणः मेगास्थनीय-फाह्यान-हुयेनसाग- इत्सिंगप्रभृतयः पाटलिपुत्रस्य वर्णन स्व-स्व संस्मरण-ग्रन्थेषु चक्रुः। यस्यवर्णनम् मयाऽपि समुचित प्रसंगे उपस्थापितोस्ति।

प्राचीनेषु भारतीयेषु नगरेष्कवन्यतमं पाटलिपुत्रमनुगंगं वसद्विचित्रं महानगरं बभूव। तद्विषये दामोदरगुप्तो नाम कविः कुट्टनीमताख्ये काव्ये अनेन रूपेण कथ्यति–

अस्ति महीतलतिलकं सरस्वतीकुलगृहं महानगरम्।

नाम्ना पाटलिपुत्रं परिभूतपुरन्दरस्थानम्।।[3]

इतिहासे श्रूयते यत् गंगायास्तीरे बुद्धकाले पाटलिग्रामः स्थितः आसीत्। यत्र च भगवान् बुद्धः बहुकृत्वः समागतः। तेन कथितमासीत् यद् ग्रामोऽयं महानगरं भविष्यति किन्तु कलहस्य अग्निदाहस्य जलपूरस्य च भयात् सर्वदाक्रान्तं भविष्यति। कालान्तरेण पाटलिग्रामः एव पाटलिपुत्रमिति कथितः। चन्द्रगुप्तमौर्यस्य काले अस्य नगरस्य शोभा रक्षाव्यवस्था च अतयुत्कृष्टासीदिति यूनानराजदूतः मेगास्थनीजः स्वसंस्मरणेषु निरूपयति। अस्य नगरस्य वैभवं प्रियदर्शिनः अशोकस्य समये सुतरां समृद्धम्।

बहुकालं पाटलिपुत्रस्य प्राचीना सरस्वतीपरम्परा प्रावर्तत इति राजशेखरः स्वकाव्यमीमांसा नामके कविशिक्षा प्रमुख ग्रन्थे सादरं स्मरति। यथा–

अत्रोपवर्षवर्षाविह पाणिनिपंगलाविह व्याडिः।

वररूचिपतंजली इह परीक्षिताः ख्यातिमुपजग्मुः।।[4]

अनेन श्लोकेन ज्ञायते यत् पाटलिपुत्र नगरे पाणिनि, पिंगल, व्याडिः, वररूचि एवंच पतंजली सदृशाः विश्वविख्याता आचार्यः निवसन्ति। अस्यारिक्तः पाटलिनपुत्र नगरे आर्यभट्ट सदृशः महान् ज्योतिविदोऽपि आसीत्। यस्यख्याति सम्पूर्ण विश्वे वर्तते। कतिपयेषु प्राचीन संस्कृतग्रन्थेषु पुराणादिषु पाटलिपुत्रस्य नामान्तरं पुष्पपुरं कुसुमपुरं वा प्राप्यते। अनेन ज्ञायते यत् नगरस्य समीपे पुष्पाणां बहुलमुत्पादनं भवति स्म। पाटलिपुत्र नगरे गंगा सदृशा पवित्र नदी विराजते। यः समस्त जीवानां पापं हरति। पालिपुत्रमिति शब्दोऽपि पाटलपुष्कपाणां पुत्तिलिका- रचनामाश्रित्य प्रचलितः। शरत्काले नगरेऽस्मिन् कौमुदी महोत्सवः इति महान् समारोहः गुप्तवंशशासनकाले अतीव प्रचलितः तत्र सर्वे जनाः आनन्दमग्नाः अभूवन्। सम्प्रति दुर्गापूजावसरे तादृशः एव समारोह दृश्यते।

पाटलिपुत्रे अनेकाः विद्वांसा विद्यन्ते। यस्य वैदुष्यम् सर्वत्र व्याप्यते। कालचक्रवशाद् यद्यपि मध्यकाले पाटलिपुत्रं वर्षसहस्त्रपरिमितं जीर्णतामन्वभूत्। तस्य संकेतः अनेकेषु साहित्यग्रन्थेषु मुद्राराक्षसादिषु लभ्यते। मुंगलवंशकाले अस्य नगरस्य समुद्धारो जातः। आंग्लशासनकाले च पाटलिपुत्रस्य सुतरां विकासे जातः। नगरमिदं मध्यकाले एव पटनेति नाम्ना प्रसिद्धमगात् अयं च शब्दः पत्तनमिति शब्दात् निर्गतः। नगरस्य पालिका देवी पटनदेवीति अद्यापि पूज्यते।

पाटलिपुत्रस्य सभायां छन्दशास्त्रस्य प्रवर्तकः पिंगलः आसीत्। अस्य छन्दसूत्रः उपलब्ध छन्दशास्त्रस्य ग्रन्थेषु सर्व प्राचीनोऽस्ति। अस्यदेशकालस्य वास्तविक स्थित अधुनाऽपि अप्राप्तोऽस्ति। एकः परम्परानुसारेण पिंगलः पाणिनि महोदयस्य अनुजः आसीत। किन्तु अस्य पुष्ट प्रमाणः न प्राप्यते। तथापि पाणिनेरनुजः पिंगलः "उरोबहती यास्कस्य इति सूत्रे यास्कं स्मरति।"[5]

छन्दशास्त्रस्य परम्पायाम् रामानुजाचार्यस्य गुरू (एकादश शताब्दी) आचार्य यादव प्रकाशेन पिंगलसूत्रस्य समाप्तोपरि एकः महत्त्वपूर्ण श्लोकस्य वर्णनम् कृतोऽस्ति–

छान्दोज्ञानमिदं भवाद्भगवतो लेभेगुरूणां गुरू।

स्तमाद् दुश्च्यवनस्ततोऽसुरगुरूर्माण्डस्यनामा ततः।।

माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिंगल–

स्तस्येदं यशस गुरोर्भुवि धृतं प्राप्यस्मादद्यः कमात्।।

युधिष्ठिरमीमांसक कृतः वैदिकच्छन्दमीमांसा ग्रन्थे बृहस्पतिदुश्चयन (इन्द्र) शुक्राचार्यः, माण्डव्य-सैतव-यास्क-पिंगलस्य नाम्मोलेखो विद्यते। यथा–

छन्दः शास्त्रमिदं पुरा त्रिनयनाल्लेम गुहोऽनादित–
स्तस्मात् प्राप्सनत्कुमारमुनिस्तस्मात् सुराणां गुरूः।
तस्माईवपतिस्ततः फणिपतिस्तस्माच्च सरिपंगलस–
तच्छिष्यैर्बहुभिर्महात्मभिरथो मयां प्रतिष्ठापितम्।।

आचार्यस्य छन्दशास्त्रं कठिनोस्ति, तेन कारणेन पिंगलाचार्येन छन्दसूत्रस्य निमाण कृतोस्ति। पिंगल छन्दशास्त्रे अष्टध्याया सन्ति। यथा–

छन्दो वक्ष्ये मूलशब्दैः पिंगलोक्तं यथाक्रमम्।।[6]
छन्दशास्त्रे पिंगलस्य एकाधिकारो विद्यते।

निष्कर्ष रूपेण प्राप्यते यत्- सम्प्रति पाटलिपुत्रम् (पटना नाम नगरम्) अति विशालं वर्तते। बिहाररस्य राजधानी चास्ति। अनुदिनं नगरस्य विस्तार: भवति। अस्योत्तरस्यां दिशि गंगा नदी प्रवहति। तस्या उपरि गाँधीसेतुर्नाम एशिया महादेशस्य दीर्घतमः सेतुः किंच रेलयानसेतुरपि निर्मीयमानो वर्तते। नगरेऽस्मिन् उत्कृष्टः संग्राहलय, उच्चन्यायालयः, सचिवालयः, गोलगृहम्, तारामण्डलम्, महावीरमन्दिरम् इत्येते दर्शनीया सन्ति।[7] प्राचीनपटनानगरे सिखसम्प्रदायस्य पूजनीयं स्थलं दशमगुरोः गोविन्दसिंहस्य जन्मस्थानं गुरूद्वारेति नाम्ना प्रसिद्धिं वर्तते। तत्र देशस्यास्य तीर्थयात्रिणः दर्शनार्थमायान्ति। ऐतिहासिक दृष्या एवंच काव्यदृष्या पाटलिपुत्रनगरस्य महति विशेषता विद्यते। अनेन प्रतीयते यत् पाटलिपुत्रस्य वैभवम् अद्वितीयो विद्यते।

**सन्दर्भाः**


1. संस्कृतसाहित्येतिहास:- पृ०सं०- 125।
2. काव्यमीमांसायाम्।
3. कुट्टनीमताख्ये काव्ये पद्य सं०– 175।
4. काव्यमीमांसायाम्।
5. पिंगलछन्दशास्त्रम् 3/30।
6. पिंगलछन्दशास्त्रम् 328/1।
7. बिहारदर्पणनामके पुस्तके।